# Raghuvansha by Kalidas Chapter 8

# રઘુવંશં સર્ગઃ ૮ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha8

File name : raghuvansha8.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : April 28, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# Raghuvansha by Kalidas Chapter 8

# રઘુવંશં સર્ગઃ ૮ કાલિદાસકૃતમ્

અથ તસ્ય વિવાહકૌતુકં લલિતં બિભ્રત એવ પાર્થિવઃ ।
વસુધામપિ હસ્તગામિનીમકરોદિન્દુમતીમિવાપરામ્ ॥ ૮-૧॥

દુરિતૈરપિ કર્તુમાત્મસાત્પ્રયતન્તે નૃપસૂનવો હિ યત્ ।
તદુપસ્થિતમગ્રહીદજઃ પિતુરાજ્ઞેતિ ન ભોગતૃષ્ણયા ॥ ૮-૨॥

અનુભૂય વસિષ્ઠસંભૃતૈઃ સલિલૈસ્તેન સહાભિષેચનમ્ ।
વિશદોચ્છ્વસિતેન મેદિની  કથયામાસ કૃતાર્થતામિવ ॥ ૮-૩॥

સ બભૂવ દુરાસદઃ પરૈર્ગુરુણાઽથર્વવિદા કૃતક્રિયઃ ।
પવનાગ્નિસમાગમો હ્યયં સહિતં બ્રહ્મ યદસ્ત્રતેજસા ॥ ૮-૪॥

રઘુમેવ નિવૃત્તયૌવનં તમમન્યન્ત નવેશ્વરં પ્રજાઃ ।
સ હિ તસ્ય ન કેવલાં શ્રિયં પ્રતિપેદે સકલાન્ગુણાનપિ ॥ ૮-૫॥

અધિકં શુશુભે શુભંયુના દ્વિતયેન દ્વયમેવ સંગતમ્ ।
પદમૃદ્ધમજેન પૈતૃકં વિનયેનાસ્ય નવં ચ યૌવનમ્ ॥ ૮-૬॥

સદયં બુભુજે મહાભુજઃ સહસોદ્વેગમિયં વ્રજેદિતિ ।
અચિરોપનતાં સ મેદિનીં નવપાણિગ્રહણાં વધૂમિવ ॥ ૮-૭॥

અહમેવ મતો મહીપતેરિતિ સર્વઃ પ્રકૃતિષ્વચિન્તયત્ ।
ઉદધેરિવ નિમ્નગાશતેષ્વભવન્નાસ્ય વિમાનના ક્વચિત્ ॥ ૮-૮॥

ન ખરો ન ચ ભૂયસા મૃદુઃ પવમાનઃ પૃથિવીરુહાનિવ ।
સ પુરસ્કૃતમધ્યમક્રમો નમયામાસ નૃપાનનુદ્ધરન્ ॥ ૮-૯॥

અથ વીક્ષ્ય રઘુઃ પ્રતિષ્ઠિતં પ્રકૃતિષ્વાત્મજમાત્મવત્તયા ।
વિષયેષુ વિનાશધર્મસુ ત્રિદિવસ્થેષ્વપિ નિઃસ્પૃહોઽભવત્ ॥ ૮-૧૦॥

ગુણવત્સુતરોપિતશ્રિયઃ પરિણામે હિ દિલીપવંશજાઃ ।
પદવીં તરુવલ્કવાસસાં પ્રયતાઃ સંયમિનાં પ્રપેદિરે ॥ ૮-૧૧॥

તમરણ્યસમાશ્રયોન્મુખં શિરસા વેષ્ટનશોભિના સુતઃ ।
પિતરં પ્રણિપત્ય પાદયોરપરિત્યાગમયાચતાત્મનઃ ॥ ૮-૧૨॥

રઘુરશ્રુમુખસ્ય તસ્ય તત્કૃતવાનીપ્સિતમાત્મજપ્રિયઃ ।
ન તુ સર્પ ઇવ ત્વચં પુનઃ પ્રતિપેદે વ્યપવર્જિતાં શ્રિયમ્ ॥ ૮-૧૩॥

સ કિલાશ્રમમન્ત્યમાશ્રિતો નિવસન્નાવસથે પુરાદ્બહિઃ ।
સમુપાસ્યત પુત્રભોગ્યયા સ્નુષયેવાવિકૃતેન્દ્રિયઃ શ્રિયા ॥ ૮-૧૪॥

પ્રશમસ્થિતપૂર્વપાર્થિવં કુલમભ્યુદ્યતનૂતનેશ્વરમ્ ।
નભસા નિભૃતેન્દુના તુલામુદિતાર્કેણ સમારુરોહ તત્ ॥ ૮-૧૫॥

યતિપાર્થિવલિઙ્ગધારિણૌ દદૃશાતે રઘુરાઘવૌ જનૈઃ ।
અપવર્ગમહોદયાર્થયોર્ભુવમંશાવિવ ધર્મયોર્ગતૌ ॥ ૮-૧૬॥

અજિતાધિગમાય મન્ત્રિભિર્યુયુજે નીતિવિશારદૈરજઃ ।
અનુપાયિપદોપપ્રાપ્તયે રઘુરાપ્તૈઃ સમિયાય યોગિભિઃ ॥ ૮-૧૭॥

નૃપતિઃ પ્રકૃતીરવેક્ષિતું વ્યવહારાસનમાદદે યુવા ।
પરિચેતુમુપાંશુ ધારણાં કુશપૂતં પ્રવયાસ્તુ વિષ્ટરમ્ ॥ ૮-૧૮॥

અનયત્પ્રભુશક્તિસંપદા વશમેકો નૃપતીનનન્તરાન્ ।
અપરઃ પ્રણિધાનયોગ્યયા મરુતઃ પઞ્ચ શરીરગોચરાન્ ॥ ૮-૧૯॥

અકરોદચિરેશ્વરઃ ક્ષિતૌ દ્વિષદારમ્ભફલાનિ ભસ્મસાત્ ।
ઇતરો દહને સ્વકર્મણાં વવૃતે જ્ઞાનમયેન વહ્નિના ॥ ૮-૨૦॥

પણબન્ધમુખાન્ગુણાનજઃ ષડુપાયુઙ્ક્ત સમીક્ષ્ય તત્ફલમ્ ।
રઘુરપ્યજયત્ગુણત્રયં પ્રકૃતિસ્થં સમલોષ્ટકાઞ્ચનઃ ॥ ૮-૨૧॥

ન નવઃ પ્રભુરા ફલોદયાત્સ્થિરકર્મા વિરરામ કર્મણઃ ।
ન ચ યોગવિધેર્નવેતરઃ સ્થિરધીરા પરમાત્મદર્શનાત્ ॥ ૮-૨૨॥

ઇતિ શત્રુષુ ચેન્દ્રિયેષુ ચ પ્રતિષિદ્ધપ્રસરેષુ જાગ્રતૌ ।
પ્રસિતાવુદયાપવર્ગયોરુભયીં સિદ્ધિમુભાવવાપતુઃ ॥ ૮-૨૩॥

અથ કાશ્ચિદજવ્યપેક્ષયા ગમયિત્વા સમદર્શનઃ સમાઃ ।
તમસઃ પરમાપદવ્યયં પુરુષં યોગસમાધિના રઘુઃ ॥ ૮-૨૪॥

શ્રુતદેહવિસર્જનઃ પિતુશ્ચિરમશ્રૂણિ વિમુચ્ય રાઘવઃ ।
વિદધે વિધિમસ્ય નૈષ્ઠિકં યતિભિઃ સાર્ધમનગ્નિરગ્નિચિત્ ॥ ૮-૨૫॥

અકરોત્સ તદૌર્ધ્વદૈહિકં પિતૃભક્ત્યા પિતૃકાર્યકલ્પવિત્ ।
ન હિ તેન પથા તનુત્યજસ્તનયાવર્જિતપિણ્ડકાઙ્ક્ષિણઃ ॥ ૮-૨૬॥

સ પરાર્ધ્યગતેરશોચ્યતાં પિતુરુદ્દિશ્ય સદર્થવેદિભિઃ ।
શમિતાધિરધિજ્યકાર્મુકઃ કૃતવાનપ્રતિશાસનં જગત્ ॥ ૮-૨૭॥

ક્ષિતિરિન્દુમતી ચ ભામિની પતિમાસાદ્ય તમગ્ર્યપૌરુષમ્ ।
પ્રથમા બહુરત્નસૂરભૂદપરા વીરમજીજનત્સુતમ્ ॥ ૮-૨૮॥

દશરશ્મિશતોપમદ્યુતિં યશસા દિક્ષુ દશસ્વપિ શ્રુતમ્ ।
દશપૂર્વરથં યમાખ્યયા દશકણ્ઠારિગુરું વિદુર્બુધાઃ ॥ ૮-૨૯॥

ઋષિદેવગણસ્વધાભુજાં શ્રુતયાગપ્રસવૈઃ સ પાર્થિવઃ ।
અનૃણત્વમુપેયિવાન્બભૌ પરિધેર્મુક્ત ઇવોષ્ણદીધિતિઃ ॥ ૮-૩૦॥

બલમાર્તભયોપશાન્તયે વિદુષાં સત્કૃતયે બહુ શ્રુતમ્ ।
વસુ તસ્ય વિભોર્ન કેવલં ગુણવત્તાપિ પરપ્રયોજના ॥ ૮-૩૧॥

સ કદાચિદવેક્ષિતપ્રજઃ સહ દેવ્યા વિજહાર સુપ્રજાઃ ।
નગરોપવને શચીસખો મરુતાં પાલયિતેવ નન્દને ॥ ૮-૩૨॥

અથ રોધસિ દક્ષિણાદધેઃ શ્રિતગોકર્ણનિકેતમીશ્વરમ્ ।
ઉપવીણયિતું યયૌ રવેરુદયાવૃત્તિપથેન નારદઃ ॥ ૮-૩૩॥

કુસુમૈર્ગ્રથિતામપાર્થિવૈઃ સ્રજમાતોદ્યશિરોનિવેશિતામ્ ।
અહરત્કિલ તસ્ય વેગવાનધિવાસસ્પૃહયેવ મારુતઃ ॥ ૮-૩૪॥

ભ્રમરૈઃ કુસુમાનુસારિભિઃ પરિકીર્ણા પરિવાદિની મુનેઃ ।
દદૃશે પવનાપલેપજં સૃજતી બાષ્પમિવાઞ્જનાવિલમ્ ॥ ૮-૩૫॥

અભિભૂય વિભૂતિમાર્તવીં મધુગન્ધાતિશયેન વીરુધામ્ ।
નૃપતેરમરસ્રગાપ સા દયિતોરુસ્તનકોટિસુસ્થિતીમ્ ॥ ૮-૩૬॥

ક્ષણમાત્રસખીં સુજાતયોઃ સ્તનયોસ્તામવલોક્ય વિહ્વલા ।
નિમિમીલ નરોત્તમપ્રિયા હૃતચન્દ્રા તમસેવ કૌમુદી ॥ ૮-૩૭॥

વપુષા કરણોજ્ઝિતેન સા નિપતન્તી પતિમપ્યપાતયત્ ।
નનુ તૈલનિષેકબિન્દુના સહ દીપાર્ચિરુપૈતિ મેદિનીમ્ ॥ ૮-૩૮॥

ઉભયોરપિ પાર્શ્વવર્તિનાં તુમુલેનાર્તરવેણ વેજિતાઃ ।

વિહગાઃ કમલાકરાલયાઃ સમદુઃખા ઇવ તત્ર ચુક્રુશુઃ ॥ ૮-૩૯॥

નૃપતેર્વ્યજનાદિભિસ્તમો નુનુદે સા તુ તથૈવ સંસ્થિતા ।
પ્રતિકારવિધાનમાયુષઃ સતિ શેષે હિ ફલાય કલ્પતે ॥ ૮-૪૦॥

પ્રતિયોજયિતવ્યવલ્લકીસમવસ્થામથ સત્ત્વવિપ્લવાત્ ।
સ નિનાય નિતાન્તવત્સલઃ પરિગૃહ્યોચિતમઙ્કમઙ્ગનામ્ ॥ ૮-૪૧॥

પતિરઙ્કનિષણ્ણયા તયા કરણાપાયવિભિન્નવર્ણયા ।
સમલક્ષ્યત બિભ્રદાવિલાં મૃગલેખામુષસીવ ચન્દ્રમાઃ ॥ ૮-૪૨॥

વિલલાપ સ બાષ્પગદ્ગદં સહજામપ્યપહાય ધીરતામ્ ।
અભિતપ્તમયોઽપિ માર્દવં ભજતે કૈવ કથા શરીરિષુ ॥ ૮-૪૩॥

કુસુમાન્યપિ ગાત્રસંગમાત્પ્રભવન્ત્યાયુરપોહિતું યદિ ।
ન ભવિષ્યતિ હન્ત સાધનં કિમિવાન્યત્પ્રહરિષ્યતો વિધેઃ ॥ ૮-૪૪॥

અથવા મૃદુ વસ્તુ હિંસિતું મૃદુનૈવારભતે પ્રજાન્તકઃ ।
હિમસેકવિપત્તિરત્ર મે નલિની પૂર્વનિદર્શનં મતા ॥ ૮-૪૫॥

સ્રગિયં યદિ જીવિતાપહા હૃદયે કિં નિહિતા ન હન્તિ મામ્ ।
વિષમપ્યમૃતં ક્વચિદ્ભવેદમૃતં વા વિષમીશ્વરેચ્છયા ॥ ૮-૪૬॥

અથવા મમ ભાગ્યવિપ્લવાદશનિઃ કલ્પિત એવ વેધસા ।
યદનેન તરુર્ન પાતિતઃ ક્ષપિતા તદ્વિટપાશ્રિતા લતા ॥ ૮-૪૭॥

કૃતવત્યસિ નાવધીરણામપરાદ્ધેઽપિ યદા ચિરં મયિ ।
કથમેકપદે નિરાગસં જનમાભાષ્યમિમં ન મન્યસે ॥ ૮-૪૮॥

ધ્રુવમસ્મિ શઠઃ શુચિસ્મિતે વિદિતઃ કૈતવવત્સલસ્તવ ।
પરલોકમસંનિવૃત્તયે યદનાપૃચ્છ્ય ગતાસિ મામિતઃ ॥ ૮-૪૯॥

દયિતાં યદિ તાવદન્વગાદ્વિનિવૃત્તં કિમિદં તયા વિના ।
સહતાં હતજીવિતં મમ પ્રબલામાત્મકૃતેન વેદનામ્ ॥ ૮-૫૦॥

સુરતશ્રમસંભૃતો મુખે ધ્રિયતે સ્વેદલવોદ્ગમોઽપિ તે ।
અથ ચાસ્તમિતા ત્વમાત્મના ધિગિમાં દેહભૃતામસારતામ્ ॥ ૮-૫૧॥

મનસાપિ ન વિપ્રિયં મયા કૃતપૂર્વં તવ કિં જહાસિ મામ્ ।
નનુ શબ્દપતિઃ ક્ષિતેરહં ત્વયિ મે ભાવનિબન્ધના રતિઃ ॥ ૮-૫૨॥

કુસુમોત્ખચિતાન્વલીભૃતશ્ચલયન્ભૃઙ્ગરુચસ્તવાલકાન્ ।
કરભોરુ કરોતિ મારુતસ્ત્વદુપાવર્તનશઙ્કિ મે મનઃ ॥ ૮-૫૩॥

તદપોહિતુમર્હસિ પ્રિયે પ્રતિબોધેન વિષાદમાશુ મે ।
જ્વલિતેન ગુહાગતં તમસ્તુહિનાદ્રેરિવ નક્તમોષધિઃ ॥ ૮-૫૪॥

ઇદમુચ્છ્વસિતાલકં મુખં તવ  વિશ્રાન્તકથં દુનોતિ મામ્ ।
નિશિ સુપ્તમિવૈકપઙ્કજં વિરતાભ્યન્તરષટ્પદસ્વનમ્ ॥ ૮-૫૫॥

શશિનં પુનરેતિ શર્વરી દયિતા દ્વન્દ્વચરં પતત્રિણમ્ ।
ઇતિ તૌ વિરહાન્તરક્ષમૌ કથમત્યન્તગતા ન માં દહેઃ ॥ ૮-૫૬॥

નવપલ્લવસંસ્તરેઽપિ તે મૃદુ દૂયેત યદઙ્ગમર્પિતમ્ ।
તદિદં વિષહિષ્યતે કથં વદ વામોરુ ચિતાધિરોહણમ્ ॥ ૮-૫૭॥

ઇયમપ્રતિબોધશાયિનીં રશના ત્વાં પ્રથમા રહઃસખી ।
ગતિવિભ્રમસાદનીરવા ન શુચા નાનુ મૃતેવ લક્ષ્યતે ॥ ૮-૫૮॥

કલમન્યભૃતાસુ ભાસિતં કલહંસીષુ મદાલસં ગતમ્ ।
પૃષતીષુ વિલોલમીક્ષિતં પવનાધૂતલતાસુ વિભ્રમાઃ ॥ ૮-૫૯॥

ત્રિદિવોત્સુકયાપ્યવેક્ષ્ય માં નિહિતાઃ સત્યમમી ગુણાસ્ત્વયા ।
વિરહે તવ મે ગુરુવ્યથં હૃદયં ન ત્વવલમ્બિતું ક્ષમાઃ ॥ ૮-૬૦॥

મિથુનં પરિકલ્પિતં ત્વયા સહકારઃ ફલિની ચ નન્વિમૌ ।
અવિધાય વિવાહસત્ક્રિયામનયોર્ગમ્યત ઇત્યસાંપ્રતમ્ ॥ ૮-૬૧॥

કુસુમં કૃતદોહદસ્ત્વયા યદશોકોઽયમુદીરયિષ્યતિ ।
અલકાભરણં કથં નુ તત્તવ નેષ્યામિ નિવાપમાલ્યતામ્ ॥ ૮-૬૨॥

સ્મરતેવ સશબ્દનૂપુરં ચરણાનુગ્રહમન્યદુર્લભમ્ ।
અમુના કુસુમાશ્રુવર્ષિણા ત્વમશોકેન સુગાત્રિ શોચ્યસે ॥ ૮-૬૩॥

તવ નિઃશ્વસિતાનુકારિભિર્બકુલૈરર્ધચિતાં સમં મયા ।
અસમાપ્ય વિલાસમેખલાં કિમિદં કિન્નરકણ્ઠિ સુપ્યતે ॥ ૮-૬૪॥

સમદુઃખસુખઃ સખીજનઃ પ્રતિપચ્ચન્દ્રનિભોઽયમાત્મજઃ ।
અહમેકરસસ્તથાપિ તે વ્યવસાયઃ પ્રતિપત્તિનિષ્ઠુરઃ ॥ ૮-૬૫॥

ધૃતિરસ્તમિતા રતિશ્ચ્યુતા વિરતં ગેયમૃતુર્નિરુત્સવઃ ।
ગતમાભરણપ્રયોજનં પરિશૂન્યં શયનીયમદ્ય મે ॥ ૮-૬૬॥

ગૃહિણી સચિવઃ સખી મિથઃ પ્રિયશિષ્યા લલિતે કલાવિધૌ ।
કરુણાવિમુખેન મૃત્યુના હરતા ત્વાં વદ કિં ન મે હૃતમ્ ॥ ૮-૬૭॥

મદિરાક્ષિ મદાનનાર્પિતં મધુ પીત્વા રસવત્કથં નુ મે ।
અનુપાસ્યસિ બાષ્પદૂષિતં પરલોકોપનતં જલાઞ્જલિમ્ ॥ ૮-૬૮॥

વિભવેઽપિ સતિ ત્વયા વિના સુખમેતાવદજસ્ય ગણ્યતામ્ ।
અહૃતસ્ય વિલોભનાન્તરૈર્મમ સર્વે વિષયાસ્ત્વદાશ્રયાઃ ॥ ૮-૬૯॥

વિલપન્નિતિ કોસલાધિપઃ કરુણાર્થગ્રથિતં પ્રિયાં પ્રતિ ।
અકરોત્પૃથિવીરુહાનપિ સ્રુતશાખારસબાષ્પદૂષિતાન્ ॥ ૮-૭૦॥

અથ તસ્ય કથંચિદઙ્કતઃ સ્વજનસ્તામપનીય સુન્દરીમ્ ।
વિસસર્જ તદન્ત્યમણ્ડનામનલાયાગુરુચન્દનૈધસે ॥ ૮-૭૧॥

પ્રમદામનુ સંસ્થિતઃ શુચા નૃપતિઃ સન્નિતિ વાચ્યદર્શનાત્ ।
ન ચકાર શરીરમગ્નિસાત્સહ દેવ્યા ન તુ જીવિતાશયા ॥ ૮-૭૨॥

અથ તેન દશાહતઃ પરે ગુણશેષામપદિશ્ય ભામિનીમ્ ।
વિદુષા વિધયો મહર્દ્ધયઃ પુર એવોપવને સમાપિતાઃ ॥ ૮-૭૩॥

સ વિવેશ પુરીં તયા વિના ક્ષણદાપાયશશાઙ્કદર્શનઃ ।
પરિવાહમિવાવલોકયન્સ્વશુચઃ પૌરવધૂમુખાશ્રુષુ ॥ ૮-૭૪॥

અથ તં સવનાય દીક્ષિતઃ પ્રણિધાનાદ્ગુરુરાશ્રમસ્થિતઃ ।
અભિષઙ્ગજડં વિજજ્ઞિવાનિતિ શિષ્યેણ કિલાન્વબોધયત્ ॥ ૮-૭૫॥

અસમાપ્તવિધિર્યતો મુનિસ્તવ વિદ્વાનપિ તાપકારણમ્ ।
ન ભવન્તમુપસ્થિતઃ સ્વયં પ્રકૃતૌ સ્થાપયિતું પથશ્ચ્યુતમ્ ॥ ૮-૭૬॥

મયિ તસ્ય સુવૃત્ત વર્તતે લઘુસંદેશપદા સરસ્વતી ।
શ્રુણુ વિશ્રુતસત્ત્વસાર તાં હૃદિ ચૈનામપધાતુમર્હસિ ॥ ૮-૭૭॥

પુરુષસ્ય પદેષ્વજન્મનઃ સમતીતં ચ ભવચ્ચ ભાવિ ચ ।
સ હિ નિષ્પ્રતિઘેન ચક્ષુષા ત્રિતયં જ્ઞાનમયેન પશ્યતિ ॥ ૮-૭૮॥

ચરતઃ કિલ દુશ્ચરં તપસ્તૃણબિન્દોઃ પરિશઙ્કિતઃ પુરા ।
પ્રજિઘાય સમાધિભેદિનીં હરિરસ્મૈ હરિણીં સુરાઙ્ગનામ્ ॥ ૮-૭૯॥

સ તપઃપ્રતિબન્ધમન્યુના પ્રમુખાવિષ્કૃતચારુવિભ્રમમ્ ।

અશપદ્ભવ માનુષીતિ તાં શમવેલાપ્રલયોર્મિણા ભુવિ ॥ ૮-૮૦॥

ભગવન્પરવાનયં જનઃ પ્રતિકૂલાચરિતં ક્ષમસ્વ મે ।
ઇતિ ચોપનતાં ક્ષિતિસ્પૃશં કૃતવાના સુરપુષ્પદર્શનાત્ ॥ ૮-૮૧॥

ક્રથકૈશિકવંશસંભવા તવ ભૂત્વા મહિષી ચિરાય સા ।
ઉપલબ્ધવતી દિવશ્ચ્યુતં વિવશા શાપનિવૃત્તિકારણમ્ ॥ ૮-૮૨॥

તદલં તદપાયચિન્તયા વિપદુત્પત્તિમતામુપસ્થિતા ।
વસુધેયમવેક્ષ્યતાં ત્વયા વસુમત્યા હિ નૃપાઃ કલત્રિણઃ ॥ ૮-૮૩॥

ઉદયે મદવાચ્યમુજ્ઝતા શ્રુતમાવિષ્કૃતમાત્મવત્ત્વયા ।
મનસસ્તદુપસ્થિતે જ્વરે પુનરક્લીબતયા પ્રકાશ્યતામ્ ॥ ૮-૮૪॥

રુદતા કુત એવ સા પુનર્ભવતા નાનુમૃતાપિ લભ્યતે ।
પરલોકજુષાં સ્વકર્મભિર્ગતયો ભિન્નપથા હિ દેહિનામ્ ॥ ૮-૮૫॥

અપશોકમનાઃ કુટુમ્બિનીમનુગૃહ્ણીષ્વ નિવાપદત્તિભિઃ ।
સ્વજનાશ્રુ કિલાતિસંતતં દહતિ પ્રેતમિતિ પ્રચક્ષતે ॥ ૮-૮૬॥

મરણં પ્રકૃતિઃ શરીરિણાં વિકૃતિર્જીવિતમુચ્યતે બુધૈઃ ।
ક્ષણમપ્યવતિષ્ઠતે શ્વસન્યદિ જન્તુર્નનુ લાભવાનસૌ ॥ ૮-૮૭॥

અવગચ્છતિ મૂઢચેતનઃ પ્રિયનાશં હૃદિ શલ્યમર્પિતમ્ ।
સ્થિરધીસ્તુ તદેવ મન્યતે કુશલદ્વારતયા સમુદ્ધૃતમ્ ॥ ૮-૮૮॥

સ્વશરીરશરીરિણાવપિ શ્રુતસંયોગવિપર્યયૌ યદા ।
વિરહઃ કિમિવાનુતાપયેદ્વદ બાહ્યૈર્વિષયૈર્વિપશ્ચિતમ્ ॥ ૮-૮૯॥

ન પૃથગ્જનવચ્છુચો વશં વશિનામુત્તમ ગન્તુમર્હસિ ।
દ્રુમસાનુમતાં કિમન્તરં યદિ વાયૌ દ્વિતયેઽપિ તે ચલાઃ ॥ ૮-૯૦॥

સ તથેતિ વિનેતુરુદારમતેઃ પ્રતિગૃહ્ય વચો વિસસર્જ મુનિમ્ ।
તદલબ્ધપદં હૃદિ શોકઘને પ્રતિયાતમિવાન્તિકમસ્ય ગુરોઃ ॥ ૮-૯૧॥

તેનાષ્ટૌ પરિગમિતાઃ સમાઃ કથંચિદ્બાલત્વાદવિતથસૂનૃતેન સૂનોઃ ।
સાદૃશ્યપ્રતિકૃતિદર્શનૈઃ પ્રિયાયાઃ સ્વપ્નેષુ ક્ષણિકસમાગમોત્સવૈશ્ચ ॥ ૮-૯૨॥

તસ્ય પ્રસહ્ય હૃદયં કિલ શોકશઙ્કુઃ
પ્લક્ષપ્રરોહ ઇવ સૌધતલં બિભેદ ।
પ્રાણાન્તહેતુમપિ તં ભિષજામસાધ્યં

લાભં પ્રિયાનુગમને ત્વરયા સ મેને ॥ ૮-૯૩॥

સમ્યગ્વિનીતમથ વર્મહરં કુમાર-
માદિશ્ય રક્ષણવિધૌ વિધિવત્પ્રજાનામ્ ।
રોગોપસૃષ્ટતનુદુર્વસતિં મુમુક્ષુઃ
પ્રાયોપવેશનમતિર્નૃપતિર્બભૂવ ॥ ૮-૯૪॥

તીર્થે તોયવ્યતિકરભવે જહ્નુકન્યાસરય્વો-
ર્દેહત્યાગાદમરગણનાલેખ્યમાસાદ્ય સદ્યઃ ।
પૂર્વાકારાધિકતરરુચા સંગતઃ કાન્તયાસૌ
લીલાગારેષ્વરમત પુનર્નન્દનાભ્યન્તરેષુ ॥ ૮-૯૫॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસ-
કૃતાવજવિલાપો નામાષ્ટમઃ સર્ગઃ ॥

---

Encoded and Proofread by Arvind Kolhatkar akolhatkar at rogers.com

---

*Raghuvansha by Kalidas Chapter 8*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*